# संस्कृत-वार्ता:

**दिनाङ्क :-01.08.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

**वायनाड-भूस्खलनम्**

वायनाड-भूस्खलनसन्दर्भे गृहमन्त्री अमितशाह: उक्तवान् यत् केरलराज्याय पूर्वमेव जुलाईमासस्य त्रयोविंश्यां-चतुर्विंश्यां-पञ्चविंश्याञ्च सुरक्षादृशा अतिवृष्टे: संचेतनाया: सूचना प्रदत्तासीत्। राज्यसभाया: ध्यानाकर्षणसत्रे श्रीअमितशाह: प्रोक्तवान् यत् एतदतिरिच्च अपि जुलाई-षड्विंश्याम् अतोऽपि एका अपरा सुरक्षा-संचेतना अतिवृष्टिमभिलक्ष्य राज्यशासनाय प्रदत्तासीत्। अमुना भणितं यत् आपदुद्धारबलमपि पूर्वमेव तत्र सम्प्रेषितमासीत् परं केरलशासनेन तस्य बलस्य यथोचितं नियोजनं ससमयं नैवाचरितम्। येन जनानामुद्धारकार्यमपि ससमयं नजातमिति। गृहमन्त्रिणा प्रोक्तं यत् यदि केरलशासनेन यथाकालं निर्देशान् अनुपाल्य सर्वमेवम् आचरितम् अभविष्यत् तदा मृतकानां संख्या इयति अधिका नैव वर्धिता स्यात्। केरले सुरक्षोद्धार-कर्मिभि: वायनाडस्य मुण्डक्कई मध्ये शवानां निष्कासनं समारब्धम् अस्ति। यत्र दुरापन्ने भीषण-भू-स्खलनस्य कारणेन बृहन्मात्रायां जन-धन-क्षति: जातास्ति। आमान्यते यत् मृत्तिकान्तरे, पाषाण-खण्डानामधस्ताच्च नैके शवा: निपीडिता: सन्ति। मलप्पुरम्-जनपदे चलियार-नद्या: नैके शवा: निष्काष्यमाणा: सन्ति। ध्येयम् अस्ति यत् भूस्खलने नैके शवा: नद्यां प्रवाहिता: आसन्। साम्प्रतं यावत् अस्यां दुर्घटनायां मृतकानां संख्या समेध्य वर्धतेतराम्। सूचनाप्राप्तिं यावत् द्विशततोप्यधिका: जना: मृत्युमुपगता: सन्ति। नैके पारेशतं व्रणिता: जना: विभिन्नेषु चिकित्सालयेषु उपचाराधीना: वर्तन्ते। एतदपि सूच्यते यत् अतोऽपि पारेशतं जना: विलुप्ता: वर्तन्ते। किन्तु एषा संख्या इतोऽपि वर्धितुं शक्नोति।

**राज्यसभा/निर्मला सीतारमण:**

वित्तमन्त्री निर्मलासीतारामणः उक्तवती यत् केन्द्रीय आयव्ययेन विकासः, वृत्यावसराः, कल्याणः, निवेशः, वित्तीयसमेकनम् इत्यादीनां प्राथमिकतासु उत्तमः संतुलनः विनिर्मितः। सुश्री सीतारामणः ह्यः राज्यसभायां चतुर्विंशत्यधिक द्विसहस्रं-पञ्चविंशत्यधिक द्विसहस्रं केन्द्रीय-वित्तसंकल्पना-विषये उत्तरं ददति स्म। **'सबका साथ, सबकाविकास, सबकाविश्वास, सबकाप्रयास'** इत्यादर्शवाक्ये सर्वकारः विश्वसिति इति सा प्रोक्तवती। वित्तमन्त्री सबलं प्रतिपादितवती यत् वित्तसंकल्पनायां सहकारीसङ्घवादं अविचलसमर्थनं प्रस्तावितमं वर्तते।

**यूपीएससी/ पूजाखेडकर**

संघलोकसेवाआयोगेन-यूपीएससी इत्यनेन आईएएस प्रशिक्षुपूजा खेडकरस्य कृते भविष्ये सर्वासु परीक्षासु स्थायिरूपेण निषेधाज्ञा प्रसारिता। यूपीएससी इत्यनेन विज्ञप्तौ घोषितं यत् उपलब्धानां अभिलेखानां परीक्षणानन्तरं सुश्रीखेडकरं लोकसेवापरीक्षा-सीएसई द्वाविंशत्यधिक द्विसहस्रेत्यस्य नियमानाम् उल्लङ्घनस्य दोषीति ज्ञातम्।

**<u>इस्माइल हानिया मृत्यु:</u>**

'हमास' इत्यातंकि-गुल्मस्य राजनीतिक-नेतु: इस्माइल-हानियाया: तेहरान-मध्ये हत्या जाता। ईरान-देशस्य 'इस्लामिक रिवोल्यूशनरी गार्ड कॉर्प्स' इत्याख्येन बलेन एकस्मिन् वक्तव्ये प्रतिपादितमस्ति यत् 'हानिया' तस्यैक: अंगरक्षकश्च ईरानस्य राजधान्यां तस्य आवासे एव पञ्चतां प्रापितौ। 'हानिया' ईरान-राष्ट्रपते: मसूद-पेजेशकियानस्य शपथग्रहण-समारोहे भागं भजितुम् आगत: आसीत्। ध्येयमस्ति यद् हानिया हमासातंकि-गुल्मस्य पक्षत: भूरि-शान्तिवार्तासु सक्रिय: अवर्तत।

**॥इति वार्ता:॥**